

# ॥ શ્રીકૃષ્ણ સ્તુતિઃ - શ્રીહરિવંશ પુરાણમ્ ॥

## Sri Krishna Stuti – Garuda – Harivamsha Puranam

The following is a rare hymn on **Lord Krishna** by **Garuda** taken from **Harivamsha Mahapuranam, Vishnu Parva** and **Chapter 121**.

ગરુડ ઉવાચ -

વેદાધ્યક્ષઃ સુરાધ્યક્ષઃ સર્વ-કામ-પ્રદો ભવાન્ ।
અમોઘ-દર્શનસ્ ત્વં હિ વરાર્થિષુ-વર-પ્રદઃ ॥ ૧ ॥

ચતુર્ભુજશ્ ચતુર્મૂર્તિશ્ ચાતુર્હોત્ર-પ્રવર્તકઃ ।
ચાતુરાશ્રમ્યહોતા ચ ચતુર્નેતા મહાકવિઃ ॥ ૨ ॥

ધનુર્ધરશ્ ચક્રધરો ભવાઞ્ છઙ્ખધરો મહાન્ ।
ભવાન્ પૂર્વેષુ દેહેષુ ખ્યાતો ભૂમિધરઃ પ્રભો ॥ ૩ ॥

લાઙ્ગલી મુસલી ચક્રી દેવકી-તનયો ભવાન્ ।
ચાણૂર-મથનશ્ ચૈવ ગોપ્રિયઃ કંસહા ભવાન્ ॥ ૪ ॥

ગોવર્ધનધરશ્ ચૈવ મલ્લારિર્ મલ્લ-ભાવનઃ ।
મલ્લપ્રિયો મહામલ્લો મહાપુરુષ ઇત્યપિ ॥ ૫ ॥

વિપ્રપ્રિયો વિપ્રહિતો વિપ્રજ્ઞો વિપ્રભાવનઃ ।
બ્રહ્મણ્યશ્ચ વરેણ્યશ્ચ ભવાન્ દામોદરઃ સ્મૃતઃ ।
પ્રલમ્બ-મથનશ્ ચૈવ કેશિહા દાનવાન્તકઃ ॥ ૬ ॥

અસિલોમ્નશ્ચ હન્તા ચ તથા રાવણ-નાશનઃ ।
વિભીષણસ્ય ભગવાન્ રાજ્યદો વાલિ-નાશનઃ ॥ ૭ ॥

સુગ્રીવ-રાજ્યદાતા ત્વં બલિ-રાજ્યાઽપહારકઃ ।
રત્નહર્તા મહારત્નં સમુદ્રોદર-સમ્ભવમ્ ॥ ૮ ॥

વરુણશ્ચ ભવાન્ ખ્યાતો ભવાંશ્ચ સરિદ્ ઉદ્ભવઃ ।
ભવાન્ ખડ્ગધરો ધન્વી ધનુર્ધરવરો મહાન્ ॥ ૯ ॥

દાશાર્હ-ઇતિ-વિખ્યાતો મહાધન્વા ધનુઃ-પ્રિયઃ ।
ગોવિન્દ-ઇતિ-વિખ્યાત ઉદધિસ્ ત્વં ચ સુવ્રત ॥ ૧૦ ॥

આકાશશ્ચ તપશ્ ચૈવ સમુદ્ર-મથનો ભવાન્ ।
ભવાન્ સ્વર્ગો બહુફલો ભવાન્ સ્વર્ગધરો મહાન્ ॥ ૧૧ ॥

ત્વમેવ ચ મહામેઘો બીજ-નિષ્પત્તિરેવ ચ ।
ત્રૈલોક્ય-મથનસ્ ત્વં ચ ક્રોધ-લોભ-મનોરથઃ ॥ ૧૨ ॥

ભવાન્ કામપ્રદશ્ ચૈવ કામઃ સર્વધનુર્ધરઃ ।
સંવર્તો-વર્તનશ્ ચૈવ પ્રલયો નિલયો મહાન્ ॥ ૧૩ ॥

હિરણ્યગર્ભો રૂપજ્ઞો રૂપવાન્ મધુસુદનઃ ।
ઈશસ્ ત્વં ચ મહાદેવ અસઙ્ખ્યેય-ગુણાન્વિતઃ ॥ ૧૪ ॥

સ્તોતું-ઇચ્છસિ માં દેવ સ્તોતવ્યસ્ ત્વં યદૂત્તમ ।
ચક્ષુષા યે ત્વયા ઘોરાઃ પ્રાણિનો હિ નિરીક્ષિતાઃ ॥ ૧૫ ॥

હતાસ્તે યમ-દણ્ડેન તિર્યઙ્ નિરય-ગામિનઃ ।
યે ત્વયા પરમ-પ્રીત્યા પ્રાણિનો વૈ નિરીક્ષિતાઃ ॥ ૧૬ ॥

ઇહ ચ પ્રેત્ય તે સર્વે સર્વથા સ્વર્ગ-ગામિનઃ ।
એષ તેઽહં મહાભાગો વશગઃ શાસને સ્થિતઃ ॥ ૧૭ ॥

---

॥ ઇતિ શ્રીમહાભારતે ખિલભાગે હરિવંશે વિષ્ણુ-પર્વણિ ગરુડ-કૃત શ્રીકૃષ્ણ-સ્તુતિઃ સમ્પૂર્ણમ્ ॥